यद्यच्च किञ्चिदिष्टं मनसो वाजीकरं तत्तत् ॥
मधुमुखमिव सोत्पलं प्रियाया:
कलरणनापरिवादिनी प्रियेव ।
कुसुमचयमनोरमा च शय्या
किसलयिनी लतिकेव पुष्पिताग्रा ॥
देशे शरीरे च न काचिदर्त्ति-
रर्थेषु नाल्पोऽपि मनोविघात: ।
वाजीकरा: सन्निहिताश्च योगा:
कामस्य कामं परिपूरयन्ति ।”
इति वाभटे उत्तरस्थाने ४० अध्याय: ॥

तथाच ।
“वाजीकरणमन्विच्छेत् पुरुषो नित्यमात्मवान् ।
तदायत्तौ हि धर्म्मार्थौ प्रीतिश्च यश एव च ॥
पुत्त्रस्यायतनं ह्येतद्गुणाश्चैते सुताश्रया: ।
वाजीकरणमग्र्यञ्च क्षेत्रं स्त्री या प्रहर्षिणी ॥
इष्टा ह्येकैकशोऽप्यर्था: परं प्रीतिकरा: स्मृता: ।
किं पुन: स्त्रीशरीरे ये संघातेन व्यवस्थिता: ॥
सङ्घातो हीन्द्रियार्थानां स्त्रीषु नान्यत्र विद्यते ।
स्त्र्याश्रयो हीन्द्रियार्थो य: सप्रीतिजननोऽधिक: ॥”
“चित्रदीप: सर:शुष्कमधातुर्धातुसन्निभ: ।
निष्फलस्तृणपूलीति ज्ञातव्य: पुरुषाकृति: ॥
अप्रतिष्ठश्च नग्नश्च शून्यश्चैकेन्द्रियश्च ना ।
मन्तव्यो निष्क्रियश्चैव यस्यापत्यं न विद्यते ॥
बहुमूर्त्तिर्बहुमुखो बहुव्यूहो बहुक्रिय: ।
बहुचक्षुर्बहुज्ञानो बह्वात्मा च बहुप्रज: ॥
मङ्गल्योऽयं प्रशस्तोऽयं धन्योऽयं वीर्य्यवानयम् ।
बहुशाखोऽयमिति च स्तूयते ना बहुप्रज: ॥
प्रीतिर्ब्बलं सुखं वृत्तिर्विस्तारो विभव: कुलम् ।
यशोलोका: सुखोदर्कास्तुष्टिश्चापत्यसंश्रिता ॥
तस्मादपत्यमन्विच्छन् गुणांश्चापत्यसंश्रितान् ।
वाजीकरणनित्य: स्यादिच्छेत् कामसुखानि च ।
माषाणामात्मगुप्ताया बीजानामाढकं नवम् ॥
जीवकर्षभकौ वीरं मेदाम्वृद्धिं शतावरीम् ।
मधुकञ्चाश्वगन्धाञ्च साधयेत् कुडवोन्मिताम् ॥
रसे तस्मिन् घृतप्रस्थं गव्यं दशगुणं पय: ।
विदारीणां रसप्रस्थं प्रस्थमिक्षुरसस्य च ॥
दत्त्वा मृद्वग्निना साध्यं सिद्धं सर्पिर्निधापयेत् ।
शर्करायास्तुगाक्षीर्य्या: क्षौद्रस्य च पृथक् पृथक् ॥
भागांश्चतुष्पलांस्तत्र पिप्पल्याश्चावपेत् पलम् ।
पलं पूर्व्वमतो लीढ्वा ततोऽन्नमुपयोजयेत् ॥
य इच्छेदक्षयं शुक्रं शेफसश्चोत्तमं बलम् ।”
इति वाजीकरणं घृतम् ॥ * ॥
“चटकानां सहंसानां दक्षाणां शिखिनान्तथा ।
शिशुमारस्य नक्रस्य भिषक् शुक्राणि संहरेत् ॥
गव्यं सर्पिर्वराहस्य कुलिङ्गस्य वसामपि ।
षष्टिकानाञ्च चूर्णानि चूर्णं गौधूममेव च ॥
एभि: पूपलिका: कार्य्या: शष्कुल्यो वर्त्तिकास्तथा ॥
पूपाधानाश्च विविधा भक्ष्याश्चान्ये पृथग्विधा: ।
एषां प्रयोगाद्भक्ष्याणां स्तब्धेनापूर्णरेतसा ॥
शेफसा वाजिवद्याति यावदिच्छन् स्त्रियो नर: ।”
इति वृष्यपूपालिकयोग: ॥ * ॥
“मण्डलैर्जातरूपस्य तस्या एव पय:शृतम् ।
अपत्यजननं सिद्धं सघृतक्षौद्रशर्करम् ॥”
“आर्द्राणि मत्स्यमांसानि भृष्टानि शफरीश्च वा ।
तप्ते सर्पिषि य: खादेत् स गच्छेत् स्त्रीषु न क्षयम् ॥
घृतभृष्टान् रसे छागे रोहितान् फलसाधिते ॥
अनुपीतरसान् सिद्धानपत्यार्थी प्रयोजयेत् ॥”
इति गर्भाधानकरो योग: ॥ * ॥
“नर्त्ते वै षोड़शाद्वर्षात् सप्तत्या: परतो न च ।
आयुष्कामो नर: स्त्रीभि: संयोगं कर्त्तुमर्हति ॥
अतिबालो ह्यसम्पूर्णसर्व्वधातु: स्त्रियो व्रजन् ।
उपतप्येत सहसा तड़ागमिव काजलम् ॥
शुष्करूक्षं यथाकाष्ठं जन्तुदग्धं विजर्ज्जरम् ।
स्पृष्टमाशु विशीर्य्येत तथा वृद्धस्त्रियो व्रजन् ॥
जरया चिन्तया शुक्रं व्याधिभि: कर्म्मकर्षणात् ।
क्षयं गच्छत्यनशनात् स्त्रीणाञ्चातिनिषेवणात् ॥
क्षयाद्भयादविस्रम्भाच्छोकात् स्त्रीदोषदर्शनात् ।
नारीणामरसज्ञत्वादभिचारादसेवनात् ॥
क्षमस्यापि स्त्रियो गन्तुं न शक्तिरुपजायते ।
देहसत्त्वबलापेक्षो हर्ष: शक्तिश्च हर्षणा ॥”
इति चरके चिकित्सितस्थाने द्वितीयेऽध्याये ॥)

वाञ्छा, स्त्री ( वाञ्छनमिति । वाछि इच्छायाम् । गुरोश्चेत्य: । टाप् । ) आत्मवृत्तिगुणविशेष: । सा च द्विविधा यथा । उपायविषयिणी फलविषयिणी वा । फलं सुखं दु:खाभावश्च । तत्र फलेच्छां प्रति फलज्ञानं कारणम् । उपायेच्छां प्रति इष्टसाधनताज्ञानं कारणम् । इति सिद्धान्तमुक्तावली ॥ तत्पर्य्याय: । इच्छा २ काङ्क्षा ३ स्पृहा ४ ईहा ५ तृट् ६ लिप्सा ७ मनोरथ: ८ काम: ९ अभिलाष: १० तर्ष: ११ । इत्यमर: ।१।७।२७। आकाङ्क्षा १२ कान्ति: १३ अग्रचय: १४ दोहद: १५ आभिलाष: १६ । इति शब्दरत्नावली ॥ रुच् १७ रुचि: १८ मति: १९ दोहलम् २० छन्द: २१ । इति जटाधर: ॥ (यथा, कथासरित्सागरे ।११।२७।
“सन्दिदेश च यद्यस्ति वाञ्छा मच्छ्वशुरं प्रति ।
तत्पुत्त्राशस्तदिहैवैषा भवता प्रेष्यतामिति ॥”)

वाञ्छितं, त्रि, ( वाञ्छ + क्त: । ) अभिलषितम् । यथा,—
“अविच्छेदं पठेद्धीमान् ध्यात्वा देवीं सरस्वतीम् ।
शुक्लाम्बरधरां देवीं मुक्ताभरणभूषिताम् ॥
वाञ्छितं फलमाप्नोति स लोके नात्र संशय: ।
इति ब्रह्मा स्वयं प्राह सरस्वत्या: स्तवं शुभम् ॥”
इति तन्त्रसार: ॥

वाञ्छिनी, स्त्री, ( वाञ्छतीति । वाञ्छ + णिनि: । ङीप् । ) वाञ्छनीया नारी । तत्पर्य्याय: । लम्पिका २ कलतूलिका ३ । इति त्रिकाण्डशेष: ॥ वाञ्छनीयमात्रे, त्रि ॥

वाटं, क्ली, वरण्ड: । गात्रभेद: । इत्यमरटीका ॥ यथा,—
“वाट: पथि वृतौ वाटं वरण्डे गात्रभेदयो: ।”
इति हेम: ॥

वाट:, पुं, ( वट्यते वेष्ट्यते इति । वट + घञ् । ) मार्ग: । वृतिस्थानम् । इति मेदिनी । टे, २८ ॥ अपि च ।
“सुखं नि:सरणे वाटे प्राचीनावेष्टकी वृति: ॥”
इति हेमचन्द्र: ॥
(वास्तु । मण्डप: । यथा, भागवते । ८।१८।२१ ।
“छत्त्रं सदण्डं सजलं कमण्डलुं
विवेश विभ्रद्धयमेधवाटम् ॥”
वटस्येदमिति । वट + अण् । वटसम्बन्धिनि, त्रि । यथा, मनु: । २ । ४५ ।
“ब्राह्मणो वैल्वपालाशौ क्षत्त्रियो वाटखादिरौ ।
पैलवौदुम्बरौ वैश्यो दण्डानर्हन्ति धर्म्मत: ॥” )

वाटशृङ्खला, स्त्री, ( वाटरोधिका शृङ्खला । शाकपार्थिवादिवत् मध्यपदलोप: ।) पथरोधकशृङ्खला । तत्पर्य्याय: । लम्भा २ । इति हारावली ॥

वाटिका, स्त्री, ( वट्यते वेष्ट्यते प्राचीरादिभिरिति । वट वेष्टने + संज्ञायामिति ण्वुल् । टाप् । अत इत्वम् । ) वास्तु । ( यथा, कथासरित्सागरे । ७२ । २०६ ।
“सा स्नानाय गते तस्मिन् शाकार्थं शाकवाटिकाम् ।
प्रविष्टा धावकखरं खादन्तं शाकमैक्षत ॥”)
वाद्यालक: । इति शब्दरत्नावली ॥ हिङ्गुपत्री । इति शब्दचन्द्रिका ॥

वाटी, स्त्री, ( वट्यते वेष्ट्यते इति । वट वेष्टने + घञ् । गौरादित्वात् ङीष् । ) वाद्यालक: । इति शब्दरत्नावली । कुटी । वास्तु । इति मेदिनी । टे, २८ ॥ शेषस्य पर्य्याय: ।
“वास्त्वस्त्री वेश्म भूर्व्वाटी वाटिका गृहपोतक: ।”
इति शब्दरत्नावली ॥
तस्या लक्षणादिर्यथा,—
विश्वकर्म्मोवाच ।
“के ते वृक्षा: प्रशस्ताश्च निषिद्धाश्चापि केचन ।
भद्रा भद्रप्रदाश्चापि तान् वदस्व जगद्गुरो ॥
केषामन्तनियुक्तञ्च शिविरञ्च शुभाशुभम् ।
दिशि कुत्र जलं भद्रमशुभञ्च वद प्रभो ॥
द्वाराणाञ्च गृहाणाञ्च प्राकाराणां प्रमाणकम् ।
भद्रप्रदश्च को वृक्षो दिशि कुत्र प्रवर्त्तते ॥
किं प्रमाणं गृहाणाञ्च प्राङ्गणानां जगद्गुरो ।
मङ्गलं कुसुमोद्यानं दिशि कुत्र तरोस्तथा ॥
प्राकारं किंप्रमाणञ्च परिखाणां सुरेश्वर ।
द्वाराणाञ्च गृहाणाञ्च प्राकाराणां प्रमाणकम् ॥
कस्य कस्य तरो: काष्ठं प्रशस्तं शिविरे प्रभो ।
अमङ्गलं वा केषां वा सर्व्वं मां वक्तुमर्हसि ॥ * ॥
श्रीभगवानुवाच ।
आश्रमे नारिकेलश्च गृहिणाञ्च धनप्रद: ।